## शास्त्री – प्राचीनव्याकरणम्

## फलितांशाः (PSO)

एतस्य कार्यक्रमस्य परिणामाः –

1. पाणिनीयाष्टाध्यायीविज्ञानावाप्तिः ।
2. सर्वेषां साधुशब्दानामेककालावच्छेदेन दर्शनसामर्थ्यावाप्तिः।
3. वेदाध्ययनसामर्थ्यावाप्तिः ।
4. व्याकरणस्य सर्वशास्त्रमुखस्थानीयत्वात् सर्वशास्त्रप्रवेशार्थं सुगमता।
5. भाषान्तरशिक्षणे सामर्थ्यावाप्तिः।
6. वर्णपदवाक्यानामुचितसंनिवेशसामर्थ्यम्।
7. भाषाविज्ञानरहस्यावबोधाय विवेकोपलब्धिः।
8. पाणिनीयसूत्राणां तर्कसङ्गतां सूत्रशैलीं च ज्ञात्वा सङ्गणकस्य सम्यग्ज्ञानपुरस्सरं नवाचारकुशलता।

## आचार्यः - प्राचीनव्याकरणम्

## फलितांशाः (Program Out Comes) -

एतस्य कार्यक्रमस्य परिणामाः

1. काशिकायाः पञ्चमाध्यायस्य षष्ठाध्यायस्य सप्तमाध्यायस्य च अध्ययनेन अष्टाध्याय्याः तत्त्वावगमनसामर्थ्यलाभः ।
2. व्याकरणमहाभाष्याध्ययनेन परिष्कारपद्धतेः विकासः ।
3. व्याकरणशास्त्रीयदार्शनिकपद्धतेः विकासः ।
4. वैदिकवाङ्मयालोडनाय बौद्धिकविकासः।
5. स्मृतिपुराणादीनामालोचनसामर्थ्यम्।
6. व्याकरणशास्त्रीयपरम्परायाः ज्ञानेन ताम् अग्रेसारयितुं सामर्थ्यावाप्तिः ।
7. शास्त्रान्तरे समीक्षणसामर्थ्यम्।

8. वैयाकरणसिद्धान्तनिरूपणाध्यनेन निर्णयक्षमताया विकासः।
9. शास्त्रव्यवहारयोः समन्वयस्थापने प्रतिभाविकासः।
10. शास्त्रि-खण्डे उक्तस्य फलितांशस्य च लाभः ।
11. विद्यावारिधिकृते प्रवेशार्हता ।

विद्यावारिधिः – प्राचीनव्याकरणम्

फलितांशाः (Program Out Comes) -

एतस्य कार्यक्रमस्य परिणामाः

1. प्राचीनपाण्डुलिपीनामुद्धारः, येन अद्यावधि अज्ञातबहुमूल्यानां ज्ञान-विज्ञान-प्रज्ञानानां प्रकाशनेन विश्वकल्याणाय नवोन्मेषः।
2. सङ्कलना-कलन-समीक्षण-विश्लेषण-परिशीलन-निष्कर्षणादि-जीवनोपयोगिप्रातिभानां समुत्कर्षः।
3. शोधप्रज्ञायाः विकासेन भारतीयज्ञानपरम्परायामवगाहने प्रावीण्यम्।
4. पाणिनि-पतञ्जलिप्रभृतिशाब्दिकाचार्य्याणां शैलीप्रज्ञया स्वस्मिन् सारस्वतजीवने अनुकरणेन गवेषकाणां महती शैक्षिकोपलब्धिः।
5. वैज्ञानिक-यान्त्रिक-तान्त्रिकादिशब्दानां कृते संस्कृतशब्दनिर्माणकौशलम्।
6. प्राचीन-व्याकरण-शास्त्रीयज्ञानार्थम् महाभाष्य-काशिकादिग्रन्थानां विवेचनात्मकं तुलनात्मकं समीक्षात्मकं विमर्शात्मकं च अध्ययनं कर्तुं शोधच्छात्राणां योग्यतायाः विकासः ।
7. विविधशोधपद्धतीनाम् अधिगमः, प्रयोगनैपुण्यञ्च शोधार्थिषु समानयनम् ।
8. प्राचीनव्याकरणग्रन्थेषु प्रौद्योगिकीविज्ञान-विचार-समीक्षण-नवाचारानुसन्धानपूर्वकं शोधलेखनविकासः ।
9. लोकभाषाणां प्राचीनव्याकरणशास्त्रीयपद्धत्या अभिनवव्याकरणसूत्रलेखनपूर्वकं शोधः समीक्षा च ।
10. सङ्गणकीयभाषाविज्ञानस्य नवाचारात्मकं समीक्षाविधिविकासः ।